# Kashi Panchakam Lyrics in Devanagari PDF

काशीपञ्चकम्

मनोनिवृत्तिः परमोपशान्तिः

सा तीर्थवर्या मणिकर्णिका च ।

ज्ञानप्रवाहा विमलादिगङ्गा

सा काशिकाहं निजबोधरूपा ॥ 1 ॥

यस्यामिदं कल्पितमिन्द्रजालं

चराचरं भाति मनोविलासम् ।

सच्चित्सुखैका परमात्मरूपा

सा काशिकाहं निजबोधरूपा ॥ 2 ॥

कोशेषु पञ्चस्वधिराजमाना

बुद्धिर्भवानी प्रतिदेहगेहम् ।

साक्षी शिवः सर्वगतोऽन्तरात्मा

सा काशिकाहं निजबोधरूपा ॥ 3 ॥

काश्यां हि काश्यते काशी काशी सर्वप्रकाशिका ।

सा काशी विदिता येन तेन प्राप्ता हि काशिका ॥ 4 ॥

काशीक्षेत्रं शरीरं त्रिभुवन-जननी व्यापिनी ज्ञानगङ्गा ।

भक्तिः श्रद्धा गयेयं निजगुरु-चरणध्यानयोगः प्रयागः

विश्वेशोऽयं तुरीयः सकलजन-मनःसाक्षिभूतोऽन्तरात्मा

देहे सर्वं मदीये यदि वसति पुनस्तीर्थमन्यत्किमस्ति ॥ 5 ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः

कृतौ काशीपञ्चकम् संपूर्णम् ॥

Text Source stotram.co.in
PDF file is generated [ October 11, 2015 ] at Stotram Website